Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 6 | ISSN : 2581- 6306

# साहित्यशास्त्रे लक्षणावैशिष्ट्यम्

**राजश्रीचट्टोपाध्याय**
**सहकारी अध्यापिका, संस्कृतविभागः, गुरुदासकलेजः, पश्चिमवङ्गः**

**सारांशः-** सर्वोऽपि हि लोकव्यवहारः शब्दाधीनो यतः सर्वोऽपि जनः स्वाभिप्रायेण परान् बोधयितुं शब्दान्नेव प्रयुङ्क्ते। तथा चात्र कस्यचिच्छब्दस्यार्थः तस्य व्युत्पत्या न लभ्यते तर्हि केनचिद् वृत्तिसामान्येन तस्यार्थोऽवगन्तव्यः इति यास्कमुनिः। सा च पदपदार्थयोः सम्बन्धरूपावृत्तिः शक्तिर्लक्षणा चेति नैयायिकाः। शक्तिर्लक्षणाव्यञ्जना चेत्यन्ये। शक्तिरूपं सम्बन्धज्ञानं पदार्थोत्थापकं भवति तथा लक्षणारूपसम्बन्धज्ञानमपि। अतः मया शक्तिवच्छब्दनिरूपितार्थस्मारकसम्बन्धविशेषे लक्षणाविषये सर्वेषां मतमुल्लिख्य तत्प्रभेद-तन्निमित्त-तद्वीजन्तत्खण्डञ्चदर्शनार्थं **साहित्यशास्त्रे लक्षणावैशिष्ट्यम्**इति शीर्षकुयक्तैः शोधलेखैः साहित्यमतमुपस्थाप्यते।

**विशेषशब्दाः-** लक्षणा, आलङ्कारिकमते लक्षणा,जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा,उपादानलक्षणा, लक्षणलक्षणा, शुद्धा सारोपा, साध्यवसाना,, गौणी,तात्पर्यानुपपत्तिः, अन्वयानुपपत्तिः इत्यादयः।

---

**साहित्यशास्त्रे लक्षणा**

**मुख्यार्थबाधे तद्योगे रूढितोथ प्रयोजनात्।**
**अन्योर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।**[1]
**मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।**
**रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पिता।**[2]

अभिधापुच्छभूता लक्षणा भवति। शक्यर्थस्य बाधे सति रूढितः, प्रयोजनात् वा तत्संवद्धः अन्योर्थः लक्षणयाश्रीयते। परन्तु अत्र हेमचन्द्राचार्येण लक्षणायाः हेतुत्वेन रूढिः न स्वीकृका। तस्य मते सा अभिधावत् एव अस्ति। मम्मटादयः लक्षणां ज्ञानस्वरूपत्वेन व्यवहारं अकुर्वन्। अत एव मुख्यार्थे अरोपितस्य शब्दस्य व्यापारत्वमङ्गिकृतम्।

---

1.काव्यप्रकाशः-2.9
2.साहित्यदर्पणः-2.5

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**आलङ्कारिकमते लक्षणा- एतेषां मते** अन्योऽर्थः यया लक्ष्यते प्रतिपाद्यते सा लक्षणा। एकावलीकारेण प्रोक्तं यत्–

**मुख्यार्थानुपपत्तौ तद्योगे रूढितोऽथवा फलात्।**

**अन्योर्थो यदि लक्ष्यो भवति तदा लक्षणाभिमता[3]।**

मुख्यार्थस्य बाधः तेन सम्बन्धः प्रसिद्धिः प्रयोजनं वा लक्षणायामुपयुज्यते। ततश्च मुख्यार्थस्य बाधे तेनैव सम्बन्धे मुख्यार्थेन अमुख्योऽर्थो यल्लक्ष्यते स आरोपितशब्दव्यापारः सान्तरार्थनिष्ठलक्षणा। तत्र कुशल इत्यादौ रूढितो लक्षणा । गाङ्गायां घोषः इत्यादौ तु प्रयोजनात्।

लक्षणाविषये प्रतापरूद्रयशोभूषणकारेण विद्यानाथेन प्रतिपाद्यते यत्– वाच्यार्थानुपपत्या तत्सम्बन्धिन्यारोपितः शब्दव्यापारो लक्षणा इति। अर्थात् वाच्यार्थानुपपत्या मुख्यार्थबाधेन हेतुना तत्सम्बन्धिनि मुख्यार्थसम्बन्धे विषये आरोपितः शब्दव्यापारः लक्षणा इत्यर्थः। अत्र यद्यपि स्वार्थं पत्यायोपरतव्यापारस्य शब्दस्य पुन्व्यापारान्तरयोगादर्थ एव लक्षक इत्यर्थव्यापारो लक्षणा तथापि वाच्यधर्मो वाचक उपचर्यत इति लक्षणायाः शब्दवृत्तिव्यवहारः[4]। कोविन्दकारः लिखति यत्

**शक्यार्थबाधे सङ्कोचः प्रचारः प्लुतिरेव वा।**

**सङ्केतस्य स्मृता वृत्तिलक्षणा योगसम्भवे।[5]**

**लक्षणायाः प्रभेदाः**- सामान्यतया अधुना सर्वेषां शास्त्राणां लक्षणाप्रभेदाः उच्यन्ते।

1) **साहित्यशास्त्रे-** लक्षणा षड्विधः। इति मम्मटः। ।

अ) **उपादानलक्षणा**– स्वसिद्धये पराक्षेपः उपादानलक्षणा। इयमेव अजहल्लक्षणेति उच्यते। यथा गौरनुबन्ध्यः।

आ) **लक्षणलक्षणा**– परार्थं स्वसमर्पणम् लक्षणलक्षणा। इयमेव जहल्लक्षणेति उच्यते। यथा गंगायां घोषः।

इ) **शुद्धा सारोपा**– यथा आयुर्घृतम्।

ई)**शुद्धा साध्यवसाना**, यथा पाञ्चालाः।

उ) **गौणी सारोपा**, यथा गौर्वाहीकः।

---

3.एकावली पृ–62

4.प्रतापरूद्रीयभूषणम्– पृ–5–

5.कोविदानन्दः– पृ–28

ऊ) **गौणी साध्यवसाना**, यथा राजकीय पुरुष: राजा।

**सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा।**

**विषय्यन्त: कृतेऽन्यस्मिन्सा स्यात्साध्यवसानिका। ।**

**भेदाविमौ च सादृश्यात्संबन्धान्तरस्तथा।**

**गौणौ शुद्धौ च विज्ञेयौ लक्षणा तेन षड्विधा।**[6]

विश्वनाथमते तु 80 संङ्ख्यका: लक्षणभेदास्सन्ति।

**लक्षणाया: वैशिष्ट्यानि-** लक्षणाया: वैशिष्ट्ये तत्प्रयोगं विचारणीयमस्ति। द्विरेफपदे तु लक्षितलक्षणा तत्र शक्यार्थस्य परम्परासम्बन्धस्वीकारात् तद्वैशिष्ट्यं दरीदृश्यते। अत अपभ्रंशस्थलेऽपि लक्षणा स्वीकार्यैव। अन्यथा काव्यप्रकाशादिषु ग्रन्थेषु लक्ष्यार्थस्य प्राकृत भाषीयोदाहरणादिकमसङ्गतं स्यात्। यथा "साहेन्ती" इत्यादि।

बोधकत्वं चात्रार्थबोधकतात्पर्याप्त्यधिकरणत्वं न च प्रत्येक वर्णेषु सा ज्ञापकतायामयं शाब्दबोधस्य ज्ञानस्यैवेष्टत्वात् समवायसम्बन्धोपस्थितमाकाशादे: शाब्दबोधविषयत्वम्।

यत्तु ज्ञाप्यत्वं न स्वजन्यबोधविषयकत्वमाकाशस्यापि समवायेन स्वाश्रयतया घटपदजन्यबोधविषयत्वेन घटपदज्ञाप्यत्वापत्ते:। न च स्वजन्यशाब्दबोधविषयत्वम्। तद् 'गङ्गायां घोष:' इत्यत्र प्रवाहस्य शाब्दबोधविषयत्वाभावेन लक्षणा नापत्तेरिति। तत्र स्वजन्य शाब्दबोधीय विषयत्वस्यैव शाब्दबोधस्वीकारात्।

'गङ्गायां घोष:' इत्यादौ तु प्रवाहसम्बन्धेनैव तीरबोधेनादोषात्। अत एव 'छत्रिणोयान्ति' इत्यादौ समुदाये एव लक्षणा स्वीकार्या प्रकारान्तरेणापि लक्षणा द्विविधा निरुढा प्रयोजनवती च। तत्र प्रयोजनाभावे शक्यार्थबोधप्रतिसन्धानपूर्वकं तत्सम्बन्धस्यपरार्थबोधे निरुढालक्षणा। यथा 'त्वचा ज्ञातम्' इत्यत्र त्वचि त्वगिन्द्रियस्य विशिष्टप्रयोजन फलत्वेन शक्यार्थबोधपूर्वकं तत्सम्बन्धपरार्थबोधात्मिका। यथा 'गङ्गायांघोष:' 'कुन्ता प्रविशन्ति' इत्यादौ अत्रार्थे घोषस्य प्रवाहरुपाधिकरणत्व कारणात् गङ्गापदेन तीरं लक्ष्यते। शैत्यपावनत्वप्रतीतिरेवात्र प्रयोजनम्।

अन्त्ये भीत्यापालायमान पुरुषस्य वाक्यमिदम्। अत्र कुन्तपदस्य तद्वारकपुरुषप्रवेशविषय तात्पर्यात् तद्धारके लक्षणा। कुन्तगत तैक्ष्ण्यप्रतीतिरेव प्रयोजनम्।

वेदान्तिनोऽपि पदार्थं द्विधा विभज्यन्ते शक्यो लक्ष्यश्च। तत्र शक्तिविषयो शक्य: लक्षणाविषयो लक्ष्य इति। लक्षणापि चैतेषां मते द्विधा वर्तते। केवललक्षणा लक्षितलक्षणा च। केवललक्षणाया लक्षणम् - शक्यसाक्षात् सम्बन्ध:। कवेल लक्षणायामुदाहरणन्तु 'गङ्गायां घोष:' इत्यत्र प्रवाहसाक्षात्सम्बन्धतीरे लक्षणा। यत्र च शक्यपरम्परा सम्बन्धेनार्थान्तर

---

[6].काव्यप्रकाश:

प्रतीतिः। तत्र लक्षितलक्षणा यथा द्विरेफपदे तत्शक्यार्थरेफद्वयस्य तद्घटितप्रभ्रमरपदद्वारा मधुकरे वृत्तिः। ननु गौण्या वृत्तेरपि विद्यमानत्वात् गौणी लक्षणाया पार्थक्येन लक्षणायाः त्रैविध्य कथं न स्यात् इति चेत् न तस्या अपि लक्षित-लक्षणायामेवान्तर्भावात्। सिंहोमाणवक इत्यादि सिंहशब्दस्य वाच्यार्थक्रौर्यादिधर्मस्य सम्बन्धेन माणवकस्य प्रतीतिः। एवञ्च वेदान्तिनः गौणी लक्षणां पृथक्त्वेन न स्वीकुर्वन्ति।

तात्पर्यानुपपत्तिरेवैतेषां मतेऽपि लक्षणायां बीजम्। पदे वाक्ये च लक्षणा वेदान्तिभिः स्वीक्रियते। अत एव गभीरायां नद्यां घोष इत्यादि स्थले एतेषां मतेऽपि पद समुदाये एव लक्षणा न तु पदे। न च वाक्ये शक्यार्थाभावात् कथं तत्र शक्यार्थ सम्बन्धरुपा लक्षणा स्वीक्रियते इति वाच्यम् - शक्त्या यत् पद सम्बन्धेन ज्ञाप्यते तत्सम्बन्धो लक्षणा ज्ञाप्यः शक्ति ज्ञाप्यश्च। अत एव यथा पदार्थे तथैव वाक्यार्थे।अतो अर्थवाद वाक्यानां प्राशस्त्ये निन्दावाक्यानां निन्दितत्वे च लक्षणा इत्यपि संगच्छते। वाक्यलक्षणाभावे तु एतत् सर्वमसङ्गतं स्यात्।

जहदजहलक्षणा विषयोऽपि एतेषां वैमत्यमस्ति। वेदान्तानुसारमत्र त्रिविधा लक्षणा भवति। जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणेति। शक्यार्थविहायार्थान्तरप्रतीतिमात्रं यत्र सा जहल्लक्षणा। यथा 'गङ्गायां घोषः'। यत्र शक्यार्थसमवेतार्थान्तरं लक्ष्यते तत्राजहल्लक्षणा। यथा शुक्लोघटः। अत्र शुक्लरुपगुणमन्तर्भाव्यैव तद्वृत्तिद्रव्ये लक्षणा। यत्र विशिष्टार्थवाचकः शब्दः एतदंशं विहाय एकदेशे वर्तते तत्र जहदजहल्लक्षणा भवति यथा 'सोऽयं देवदत्त' 'तत्वमसि' इत्यादौ। इयमेव भाग लक्षणा इत्यपि कथ्यते। वैयाकरणास्तु लक्षणां न स्वीकुर्वन्ति तेषां मते शक्तेरेव प्रसिद्धत्वाप्रसिद्धत्वभेदेन कार्यनिर्वाहात्। तथाहि गङ्गायां घोष इत्यादि स्थले गंगापदस्य भगीरथरखातावच्छिन्न प्रवाहविशेषे प्रसिद्धाशक्ति सामीप्य सम्बन्धावच्छिन्न तटत्वावच्छिन्न विषयकत्वावच्छिन्ननिरुपितार्थे अप्रसिद्धाशक्तिः। अत एव 'गङ्गायां घोषः' इत्यादौ द्वितीय शक्त्यैव निर्वाहे लक्षणा स्वीकारे नाग्रहः कर्तव्यः।अत एवोक्तम् - -

**"अर्थमात्रं विर्यस्तं शब्दः स्वार्थे व्यवस्थितः[7]"।**इति वाक्यपदीये संगच्छते।

अत एव केचनालंकारिका अपि लक्षणाया अन्यत्रान्तर्भावं कुर्वन्ति यथा वामनः लक्षणामलङ्कारेऽन्तर्भावयति। तथाहि सादृश्यात् वक्रोक्तिः। रत्नाकरो रुपके सादृश्यात् प्रयुक्तो सम्बन्धात् प्रयुक्तो वा यावान् भिन्नयोः सामानाधिकरण्यनिर्देशः स सर्वोऽपि रुपकमेव।

अत एव शक्यतावच्छेदाकारोप एव लक्षणापदेन व्यवह्रियते इति शाब्दिकानां मतम्। लक्षणा पृथक् वृत्तिरुपेण न स्वीकार्या वृत्तिद्वयावच्छेदकत्व कल्पने गौरवात्। अत एव शाब्दिकारन्या वृत्तिरिति कृत्वा लक्षणां तिरस्कुर्वन्ति। अत एव शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्य व्यक्तिबोधे व्यक्तिविशेषबोधे लक्षणेति व्यवहारः। यथा 'काकेभ्यो

---

[7].वाक्यपदीय का. 2 का 25

दधिरक्ष्यताम्' इत्यत्र दध्युपधातकमात्रे काकत्वारोप:। कमलानि कमलानि इत्यादौ सौरभविशिष्टस्यैव कमलत्वेन बोध:। अत्र कमलपदस्य कमलत्वावच्छिन्नविषयकशाब्दबोधजनकत्वेऽपि कमलत्वव्याप्यधर्मावच्छिन्नस्य बोधो लक्षणस्यैव।

नन्वत्र शक्यतावच्छेदकारोपो दुर्लभा: तद्धर्माभाववति तद्धर्मप्रकारक ज्ञानस्यैवारोप पदार्थत्वेन कमलानि कमलानि इत्यादौ तद्धर्भाभावात् इति चेत् न लक्षणास्थले लक्षकपदस्य स्वशक्यतानवच्छेदकनिष्ठप्रकारता प्रतीतिजनकस्य तादृश प्रतीतेरेव पदार्थकत्वात्।

एतेन शक्यादन्येन रुपेण ज्ञाते भवति लक्षणा इत्युक्तिरप्यपास्ता। एवञ्च "त्वामस्मि वच्मि" इत्यादौ स्वबोध्यसम्बन्धत्वादि नैवाछेदकयत्वादस्य विशिष्टत्वात् व्यक्ति बोध:। शक्यार्थारोपस्यैव लक्षणा स्वीकारात् एवं "पुंयोगादाख्यायाम्" इति सूत्रभाष्ये 'गोपी' इत्यादौ गोप सम्बन्धि स्त्रीत्वेन लक्षाणायां "तस्येदम्" [8]इति शास्त्रेण तादृशऽर्थे असंप्रत्ययस्य तादृश वाक्यस्यैव वा नियमादसाधुत्वापत्ति दूषणमभिन्धाय नावश्यमेवाभिसम्बन्धोऽस्तीति उक्त्वा चतुर्भि: प्रकारै तस्मिन् स इत्येतत् भवति।

ताटस्थ्यात् तद्धर्म्यात् तत्सामीप्यात् तत्साहचर्यात्। 'मञ्चा हसन्ति' 'सिहो माणवक:' 'गङ्गायां घोष:' 'यष्टी: प्रवेशय' इत्यादुक्तय तत्रैवेकपरोऽप्याह –"आरोप्यते तादूप्यं न तु मुख्यम्''। बालेषु मञ्चारोपात् मञ्चपदप्रवृत्ति: हसन्ति इति पदप्रयोगात् विज्ञायते। अत शक्यातावच्छेदकारोपस्य लक्षणात्वे अस्त्येव। एव भाष्यकारकैयटादीनामपि सम्मति: न च गङ्गायां घोष इति वाक्यादारोपितगङ्गात्वेन बोधेऽपि आरोपित ज्ञानस्य भ्रममूलकत्वात् शास्त्रज्ञानं कृते तस्य भ्रमत्वेन ग्रहणाच्च तदुत्तरं शैत्यपावनत्वादि रुपं प्रयोजनं न सिद्धयेत्। यथा शुक्तौ रजततया ज्ञानेऽपि भ्रमत्वेन ज्ञाते सति तत्र लोकानामप्रवृत्तिरिति वाच्यम्। व्यंजनया मुख्यगङ्गापदार्थाभेदस्यापि प्रतीते:[9]। अत एव शब्दज्ञानस्य तदभाववत्ता ज्ञानं न प्रतिबन्धकम्। शक्यतावच्छेदकत्वारोपस्य लक्षणात्वानङ्गीकारे तु गङ्गायां मीनघोषौ स्त: इति द्वान्दमपि न संगच्छेत। यतो हि द्वन्द्वार्थस्यैव यथा वा ग्राममजा नयति अजादिधनौ देवदत्तयज्ञदत्तौ इत्यादौ। यथा संख्यान्वये द्वन्द्ववारणाय पय: पयो नयति इत्यादावेकशेष कारणाय वा आवश्यकत्वेन नैयायिकरीत्या मीनस्य तीरत्वावच्छिन्नेऽन्वयेन। द्वन्द्व साधु: स्यात्। वैयाकरणानां तु गङ्गात्वेन एवतीरबोधात् एकधर्मावच्छिन्नत्वेन तु क्षति:। गौतमस्यापि शक्यतावच्छेकारोपस्य लक्षणत्वे सम्मंतिरस्ति। तथाहि "सहचरण " इति न्यायसूत्र व्यवस्थापितं तेन। अत्रारोप निमित्तानि सहचरणादीन्येव। अत एव वाक्यपदीयेऽपिगौणमुख्यार्थबोधक: शब्द एक एव। युगपत् सर्वार्थानां प्रकाशकत्वं तु न भवति प्रकरणादि निमित्तत्वाभावात्। तथाहि

---

[8].पा. सू. 4/1/48

[9].गौतम न्याय सूत्र अ. 1 आ. 2 सू. 5

**एकमाहुरनेकार्थं शब्दमन्येपरीक्षका:।**

**निमित्तभेदादेकस्य सर्वार्था तस्य भिद्यते ॥**

**सर्वशक्तेषु तस्यैव शब्दस्यानेकधर्मण:।**

**प्रसिद्धिभेदात् गौणात्वं मुख्यत्वं चोपचर्यते।।**[10]

गोत्वानुसङ्गो वाहीके निमितात् कैश्चिदिष्यते। अर्थमात्रं विपर्यस्तं शब्द: स्वार्थेव्यवस्थित:।।

अत्र कैश्चित् पदेन शब्दनित्यतावादिनो वैयाकरणा इत्यवधेयम्। ननु यदि शक्यतावच्छेदकारोप एव वैयाकरणै: स्वीक्रियते। उत वा शब्दस्य अप्रसिद्धा शक्तिरेव लक्षणेति स्वीक्रियते तदा द्विरेफपदात् भ्रमरबोधो कथं जायते इति चेत् न। द्विरेफपदं रुढिशक्त्या भ्रमरबोधकम्। अत्र रथन्तरादि पदवत् अवयवार्थ प्रतीति न भवति। अत्र पदनिष्ठरेफद्वयस्य स्वार्थे आरोपात् तत् सम्बन्धित्वेनैव भ्रमर बोध:। अत एव भ्रमर पर्यायत्वेन द्विरेफ पद पाठोऽपि कोशादौ संगच्छते। नहि गङ्गापदस्य तीरपर्यायत्वेन कुत्रापि पाठो दृष्ट:। अत्र लक्षित लक्षणा भवितुं नार्हति।

यतो हि भ्रमरपदस्यानुच्चारितत्वात् उच्चारितस्यैव चार्थ प्रत्यायकत्वात् ततो बोधानापत्ते:। अतीतानपगतानां पदानां वृत्त्यनाश्रयतया वृत्त्याश्रयं तत्र न लभ्यते। पदेष्वतीतत्वादेवमुचारणदि प्रक्रिया नाशत्वादिनैवाधिकमेवान्यथा शब्दनित्यता भङ्गापत्ते:। अत एवोच्चारितस्यैव शब्दस्यार्थबोधकता स्वीक्रियते न तु स्मृतस्य । अत: “परोक्षे लिट्” इति सूत्रे परोक्षे इति विशेषणं धातो: न सम्भवति। शब्दरुपस्य तस्यारोप परोक्षत्वासंभावात् भाष्ये। न च स्वबोध्यपद वाच्यत्वेन द्विरेफपदं लक्षणया भ्रमरं. बोधयति इति वाच्यम्। अनुपपत्तिप्रतिसन्धानं विनैव तेन बोधात्।

अत एवाप्रसिद्ध शक्त्या सर्वत्र शक्यतावच्छेदकारोपाद् बोध: सर्वत्र भविष्यति। नार्थो लक्षणया सति तात्पर्ये सर्वे सर्वार्थवाचक इति भाष्यसिद्धान्तात्। अत्र प्रसिद्धत्वं सर्वं वेद्यत्वम्। अप्रसिद्धत्वं सहृदयहृदयमात्रवेधत्वम्। ननु सर्वे सर्वार्थवाचका इति स्वीकरणेन घटपदात् पटरुपार्थबोध: कथन्न जायते इति चेत् तत्र तात्पर्याभावात्र बोध:। तात्पर्यञ्च अत्र ईश्वरदेवतामहर्षिलोकबृद्धपरम्परातो अस्मदादिभिर्लब्धो भवतीति न काचिद् विप्रतिपत्ति:।

मीमांसकाभिमतान्वयानुपपत्तिरेव लक्षणा बीजमिति तन्मत निरसनपूर्वकं यैयायिकमतेन तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति सर्वसिद्धान्तसिद्धम्। अत्र विषये इदं बोध्यम् –

यत्तु मीमांसका अन्वयानुपपत्तिरेव लक्षणाबीजं तात्पर्यानुपपत्तिर्लक्षणायां बीजत्वस्वीकारे वेदे तात्पर्याभावात् वेदार्थबोधो न स्यादिति। किञ्च यष्टी प्रवेशय इत्यादिवाक्येऽपि प्रवेशयपदस्य यष्टिभोजनक प्रवेशासम्भवात् तत्राप्यन्वयानुपपत्तेरेव लक्षणाबीजमिति कथयन्ति तन्त्र विचार: सत्यम्। सर्वत्र तात्पर्यानुपपत्तिरेव लक्षणाबीजमिति। अन्यथा “काकेभ्यो

---

[10].वाक्यपदीयम् का. 2 कारिका. 250, 255

दधिरक्ष्यताम्" इत्यत्र काकपद शक्यार्थस्य दधिरक्ष्यकेन साकमन्वय संभवेऽपि कथं तत्पदस्य दध्युपघातके काकमार्जारादौ लक्षणा विद्वद्भिः स्वीकृता संगच्छते। एवमेव यष्टी प्रवेशय इत्यत्रापि यष्टिपदशक्यार्थस्य दण्डस्य गृह प्रवेशनान्वय संभवात् कथं तत्र लक्षणा स्वीक्रियते। तात्यर्यानुपत्तेस्तु लक्षणा बीजत्वे भोजनतात्पर्येण यष्टिशब्दस्य यष्टिधरे लक्षणा सञ्जायते। अतश्च सर्वत्रैव तात्पर्यानुपपत्तिरेव लक्षाणायां बीजम्। किञ्चवेदस्थलेऽपि तात्पर्यांनुपपत्तिरेव लक्षणाबीजं वक्तुरिच्छा तात्पर्यम्। सा चेच्छा परमेश्वरस्य स एव जगतः कर्ता वेदस्य प्रथमोच्चारयिता जीवगतधर्माधर्मरधिष्ठाता कर्तुमकर्तुमन्यथाकर्तुं समर्थोऽघटितघटनां .पटीयस्य मायया परिगृहीतविविधविग्रहोऽस्ति। तदन्य एतादृशो को यस्य वेदे तात्पर्यं स्वीकुर्यात्। अतश्च वेदेऽपि भगवतः परमेश्वरस्य तात्पर्यमेव सर्वत्राङ्गीकृत्य तत्रापि तात्पर्यानुपपत्तिरेवलक्षणा बीजं स्वीकरणीयाम्।

अतश्च तार्त्यानुपपत्तिरेव लक्षणायां बीजमिति सर्वमतसिद्धसिद्धान्तोऽस्ति। यतो हि वैयाकरणाभिमते प्रसिद्धाप्रसिद्धे द्वे शक्ती ये स्तः तेऽपि तात्पर्यादेव स्वीकृते स्तः। यस्य वाक्यस्य यत्र तात्पर्यं भवति तद् वाक्यं तत्र तत् तात्पर्यबोधकत्वात् प्रसिद्धं भवति। असति तात्पर्यज्ञाने केनापि वाक्येन कस्याप्यर्थस्य ज्ञानं भवितु नार्हति सर्वत्र तस्यैव हेतुत्वात्। इति शम्।

**परिशीलितग्रन्थसूची**


1. महाभाष्यम्, पतञ्जलिः, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2008
2. वैयाकरणभूषणसारः, महामहोपाध्यायश्रीकौण्डभट्टविरचितः, चौखम्बा संस्कृत सीरीज वनारस्, 1939
3. नागेशः,परमलघुमञ्जुषा.कृष्णदास संस्कृत सीरीज्,वाराणसी 2011
4. मम्मटः, काव्यप्रकाशः, “आज” भवन् सन्त कबीर मार्ग, वाराणसी(221001 यू.पी), जुलाई, 2016
5. न्यायसिद्धान्तमुक्तावली, पं श्राकृष्णवल्लाभाचार्यः, चौखाम्वा संस्कृत संस्थान्, वाराणसी, 1999
6. विश्वनाथः, साहित्यदर्पणः, आचार्यः कृष्णमोहनशास्त्री, चौखम्बा संस्कृत संस्थान वाराणसी, पुनमुर्द्रण – 2013
7. भामहः, काव्यालङ्कारः, चौखम्बा संस्कृत सीरिज् अफिस्, वाराणसी, 2002
8. आनन्दवर्धनः, ध्वन्यालोकः, जगन्नाथपाठकः, चौखम्बा विद्यभवन, वाराणसी, संस्करणम् – 2001
9. वामनः, काव्यालङ्कारसूत्रवृत्तिः, प्रो. केदारनाथ शर्मा, कृष्णदास अकादेमी, वारणसी – 1979
10. संस्कृत शास्त्र का इतिहास, बलदेव उपाध्याय, शारदा मंदिर, वाराणसी, 1969